श्री बलराम स्तोत्रं

श्री बलराम स्तोत्रं

जय राम सदाराम सच्चिदानंदविग्रह |
अविद्यापंकगलितनिर्मलाकार ते नमः || 1 ||

जयाऽखिलजगद्भारधारण श्रमवर्जित |
तापत्रयविकर्षाय हलं कलयते सदा || 2 ||

प्रपन्नदीनत्राणाय बलरामाय ते नमः |
त्वमेवेश पराशेषकलुषक्षालनप्रभुः || 3 ||

प्रपन्नकरुणासिंधो भक्तप्रिय नमोऽस्तु ते |
चराचरफणाग्रेण धृता येन वसुंधरा || 4 ||

मामुद्धरास्मद्दुष्पाराद्भवांभोधेरपारतः |
परापराणां परमं परमेश नमोऽस्तु ते || 5 ||

इमं स्तवं यः पठति बलरामाधिदैवतं |
बलिष्ठः सर्वकार्येषु गरिष्ठः सोऽभिजायते || 6 ||

इति श्री बलराम स्तोत्रं |